त्रि, दण्डधरः ॥ (शासकः। यथा, राजतरङ्गिण्याम्। ४।१०६।
"दण्डधारे त्वयि चाप! क्षितिमेतां प्रशासति।
को वैरखेदयोः पारमनासाद्यावसीदति ॥")

दण्डनायकः, पुं, (दण्डं राज्ञां चतुर्थोपायं नयतीति। नी + ण्वुल्।) सेनानीः। स चतुरङ्गबलाध्यक्षः। इति हेमचन्द्रः। ३।३९८॥ (यथा, राजतरङ्गिण्याम्। ७।६९६।
"कन्दर्पे कोटस्थानां भिन्नानां सङ्गृहीयते।
क्रुध्यन् राजपुरीं राजा चन्द्रजद्दण्डनायकम् ॥")

दण्डनीतिः, स्त्री, (दण्डेन नीयते या। यद्वा, दण्डो नीयतेऽनयेति। नी + कर्म्मणि करणे वा क्तिन्।) अर्थशास्त्रम्। इत्यमरः। १।६।५॥ तत् चाणक्यादिप्रणीतं नीतिशास्त्रम्। इति भरतः।
तस्य निरुक्तिर्यथा,—
"दण्डेन नीयते चेदं दण्डं नयति वा पुनः।
दण्डनीतिरिति ख्याता त्रीँल्लोकानभिवर्त्तते ॥
तच्च ब्रह्मकृतशतसहस्राध्यायपरिमितम्।
तद्यथा,—
"ततोऽध्यायसहस्राणां शतचक्रे स्वबुद्धिजम्।
यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णितः ॥
त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः ॥
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ॥
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः ॥
त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ!।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥
अमात्यरक्षा प्रणिधी राजपुत्त्रस्य लक्षणम्।
चारश्च विविधोपायः प्रणिधेयः पृथग्विधः ॥
सामभेदप्रदानञ्च ततो दण्डश्च पार्थिव।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता ॥
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च।
विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलम् ॥
सन्धिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः।
भयं सत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितम् ॥
यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः।
विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह ॥
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः।
लक्षणं पञ्चवर्गस्य त्रिविधञ्चात्र वर्णितम् ॥
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः।
प्रकाशोऽष्टविधस्तत्र गुह्यश्च बहुविस्तरः ॥
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव!।
विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम् ॥
अङ्गान्येतानि कौरव्य! प्रकाशानि बलस्य च।
जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ॥
स्पर्शे चाभ्यवहार्य्ये वाप्युपांशुस्त्रिविधः स्मृतः।
अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः ॥
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह।
आत्मरक्षणमाश्वासः स्पशानां चान्ववेक्षणम् ॥
कल्पना विविधाश्चापि नृनागरथवाजिनाम्।
व्यूहाश्च विविधाभिख्या विविधं युद्धकौशलम् ॥
उत्पाताश्च निपाताश्च सुयुद्धं सुपलायनम्।
शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ!॥
बलव्यसननिर्युक्तं तथैव बलहर्षणम्।
पीड़ा चापत्कालश्च पत्तिज्ञानञ्च पाण्डव!॥
तथा खातविधानञ्च योगसञ्चार एव च।
चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीड़नम् ॥
अग्निदैरसदैश्चैव प्रतिरूपककारकैः।
श्रेणिमुख्योपजापेन वीरुधश्छेदनेन च ॥
दूषणेन च नागानां आशङ्काजननेन च।
आराधनेन भक्तस्य प्रत्ययोपार्ज्जनेन च ॥
सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धी समञ्जसम्।
दूतसामर्थ्ययोगाश्च राष्ट्रस्य च विवर्द्धनम्।
अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनम् ॥
अवमर्द्दः प्रतीघातस्तथा चैव बलीयसाम्।
व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् ॥
श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः ॥
अभृतानाञ्च भरणं भृतानाञ्चान्ववेक्षणम्।
अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता ॥
तथा राजगुणाश्चैव सेनापतिगुणाश्च ह।
कारणञ्च त्रिवर्गस्य गुणदोषास्तथैव च ॥
दुश्चेष्टितञ्च विविधं वृत्तिश्चैवानुजीविनाम्।
शङ्कितत्वञ्च सर्व्वस्य प्रमादस्य च वर्ज्जनम् ॥
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनम्।
प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्तदा ॥
विसर्गोऽर्थस्य धर्म्मार्थं कामहेतुकमुच्यते।
चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितम् ॥
क्रोधजानि तथोग्राणि कामजानि तथैव च।
दशोक्तानि कुरुश्रेष्ठ! व्यसनान्यत्र चैव ह ॥
मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ!।
कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा ॥
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च।
निग्रहोऽथात्मनस्त्यागमर्थदूषणमेव च ॥
यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः।
अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनम्।
चैत्यद्रुमावमर्द्दश्च रोधः कर्म्मान्तनाशनम् ॥
उपस्कारोऽथ वसनं तथोपायाश्च वर्णिताः।
पणवानकशङ्खानां भेरीणाञ्च युधिष्ठिर!॥
उपार्ज्जनञ्च द्रव्याणां परिमर्द्दश्च तानि षट्।
लब्धस्य च प्रशमनं सताञ्चैवाभिपूजनम् ॥
विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता।
मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया ॥
आहारयोजनञ्चैव नित्यमास्तिक्यमेव च।
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ॥
उत्सवानां समाजानां क्रियाः केतनजास्तथा।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ ॥
वृत्तिर्भरतशार्दूल! नित्यञ्चैवान्ववेक्षणम्।
अदण्ड्यत्वं च विप्राणां युक्त्या दण्डनिपातनम् ॥
अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भवः।
रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम् ॥
मण्डलस्था च या चिन्ता राजन्! द्वादशराजिका ॥
द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया।
देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः ॥
धर्म्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः।
उपायश्चात्र लिप्सा च विविधा भूरिदक्षिण!॥
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः।
दूषणं स्रोतसाञ्चैव वर्णितञ्च स्थिराम्भसाम् ॥
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः।
तत् सर्व्वं राजशार्दूल! नीतिशास्त्रेषु वर्णितम् ॥
एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः।
देवानुवाच संहृष्टः सर्व्वान् शक्रपुरोगमान् ॥
उपकाराय लोकस्य त्रिवर्गस्थापनाय च।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता ॥
दण्डेन सहिता ह्येषा लोकरक्षणकारिका।
निग्रहानुग्रहरता लोकाननुचरिष्यति ॥"
इति महाभारते राजधर्म्मः ॥
दुर्गा। यथा,—
"नयानयगता लोके विकल्पनिलयामला।
दण्डनाद्दमनाच्चापि दण्डनीतिरिति स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

दण्डपांशुलः, पुं, (दण्डेन दण्डधारणेन पांशुलो नीचः।) द्वारपालः। इति शब्दरत्नावली ॥

दण्डपाणिः, पुं, (दण्डः पाणौ यस्य।) यमः। (यथा, भागवते। १।१७।३५।
"परीक्षितैवमादिष्टः स कलिर्जातवेपथुः।
तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥")
काशीस्थशिवगणविशेषः। स पूर्णभद्रयक्षपुत्त्रः हरिकेशनामा शिवमाराध्य शिववरेण काश्यां दण्डनायकत्वमवाप्तवान्। यथा,—
"भक्तस्य धीरस्य तपोनिधेर्हरौ
हरो वराणां निकरं तदा ददौ।
चैत्रस्य यक्षास्य मम प्रियस्य भो
भवाधुना दण्डधरो वरान्मम ॥
स्थिरस्त्वमद्यादि दुरात्मदण्डकः
सुपालकः पुण्यकृताञ्च मत्प्रियः।
त्वं दण्डपाणिर्भव नामतोऽधुना
सर्व्वान् गणान् शाधि ममाज्ञयोत्कटान् ॥"
"त्वत्सात्कृतक्षेत्रवरेऽद्य यक्षराट्
कस्त्वामनाराध्य सुमुक्तिभाग्जनः।
सभाजनं प्रागत एव ते चरेत्
ततः समर्च्चां मम भक्त आदरात् ॥
मद्भक्तियुक्तोऽपि विना त्वदीयां
भक्तिं न काशीवसतिं लभेत।
गणेषु देवेषु हि मानवेषु
तदग्रमान्यो भव दण्डपाणे!॥"
इति काशीखण्डे ३२ अध्यायः।
(स्वनामख्यातचन्द्रवंशीयनृपविशेषः। यथा, मात्स्ये। ५०। ८७।
"वहीनरात्मजश्चैव दण्डपाणिर्भविष्यति ॥"
अयन्तु मासत्रयाधिकचत्वारिंशद्वर्षपर्य्यन्तं राज्यं चकार। यथा, राजावल्याम् १ परिच्छेदे।
"चत्वारिंशत् समाश्चैव सोऽपि मासत्रयाधिकाः।
बुभुजे पृथिवीमेतां दण्डपाणिर्महाबलः ॥"